# Skanda Dandakam

# સ્કન્દદણ્ડકમ્

## Document Information

Text title : Skanda Dandakam

File name : skandadaNDakam.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : March 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 14, 2020

*sanskritdocuments.org*

# સ્કન્દદણ્ડકમ્

ૐશ્રીગણેશાય નમઃ ।
(હરિગીતપુરેશશ્રીસુબ્રહ્મણ્યસ્તુતિઃ - હરિપ્પાડ્ ક્ષેત્રં - કેરળેષુ)

અયિ! જય જયામ્ભોજિનીજાનિડિમ્ભોદયોદ્યત્-
કુસુમ્ભોલ્લસત્ફુલ્લદમ્ભોપમર્દપ્રવીણપ્રભાધોરણીપૂરિતા-
શાવકાશ! વરાનન્દસાન્દ્રપ્રકાશ! ॥

સહૈવોત્તરઙ્ગીભવત્સૌહૃદાવેશમીશાનપઞ્ચાનનીપાર્વતીવક્ત્ર-
સઞ્ચુમ્બ્યમાનાનનામ્ભોજષટ્ક! દ્વિષત્કાયરક્તૌઘરજ્યત્પૃષત્ક ! ॥

સ્વકીયપ્રભુદ્વાદશાત્મદ્રઢીયસ્તમપ્રેમધામાયિતદ્વાદશા-
મ્ભોજવૃન્દિષ્ઠબંહિષ્ઠસૌન્દર્યધુર્યેક્ષણ ! સાધુસંરક્ષણ ! ॥

નિજચરણવન્દનાસક્તસદ્વૃન્દભૂયસ્તરાનન્દદાયિસ્ફુર-
ન્મન્દહાસદ્યુતિસ્યન્દદૂરીકૃતામન્દકુન્દપ્રસૂનપ્રભા-
કન્દળીસુન્દરત્વાભિમાન ! સમસ્તામરસ્તોમસંસ્તૂયમાન ! ॥

જગત્યાહિતાત્યાહિતાદિત્યપત્યાહિતપ્રૌઢવક્ષઃસ્થલોદ્વચ્છ-
દાસ્રચ્છટાધૂમળચ્છાયશક્તિસ્ફુરત્પાણિપાથોરુહ !
ભક્તમન્દારપૃથ્વીરુહ ॥

વિહિતપરિરમ્ભવલ્લીવપુર્વલ્લરીમેળનોલ્લાસિતોરસ્તટશ્રી-
નિરસ્તાચિરજ્યોતિરાશ્લિષ્ટસન્ધ્યામ્બુદાનોપમાડમ્બર !
તપ્તજામ્બૂનદભ્રાજમાનામ્બર ! ॥

પિઞ્છભારપ્રભામણ્ડલીપિણ્ડિતાખણ્ડલેષ્વાસનાખણ્ડ-
રોચિશ્શિખણ્ડિપ્રકાણ્ડોપરેદ્યોતમાન !
પદશ્રીહૃતશ્રીગૃહવ્રાતમાન ! ॥

પ્રથિતહરિગીતાલયાલઙ્કૃતે ! કાર્તિકેય ! આર્તબન્ધો !
દયાપૂરસિન્ધો ! નમસ્તે સમસ્તેશ ! માં પાહિ પાહિ પ્રસીદ પ્રસીદ ॥

કારુણ્યામ્બુનિધે! સમસ્તસુમનસ્સન્તાપદાનોદ્યત-
સ્ફાયદ્દર્પભરાસુરપ્રભુસમૂલોન્મૂલનૈકાયન !
બિભ્રાણઃ ક્ષિતિભૃદ્વિભેદનચણાં શક્તિં ત્વમાગ્નેય ! માં
પાહિ શ્રીહરિગીતપત્તનપતે ! દેહિ શ્રિયં મે જવાત્ ॥

ઇતિ સ્કન્દદણ્ડકં સમ્પૂર્ણમ્ ।

Entered by Sivakumar Thyagarajan

Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Skanda Dandakam*

pdf was typeset on March 14, 2020

Please send corrections to *sanskrit@cheerful.com*